# shrIvIrabhadrasahasranAmastotram

# શ્રીવીરભદ્રસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : vIrabhadrasahasranAmastotram

File name : vIrabhadrasahasranAmastotram.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : October 9, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# શ્રીવીરભદ્રસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।
શ્રીવીરભદ્રાય નમઃ ।
શ્રીભદ્રકાલ્યૈ નમઃ ।

॥ શ્રીવીરભદ્રસહસ્રનામસ્તોત્રમ્ ॥

પૂર્વભાગમ્ ।

ૐ અસ્ય શ્રીવીરભદ્રસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
નારાયણઋષિઃ । અનુષ્ટુપ્છન્દઃ । શ્રીવીરભદ્રોદેવતા ।
શ્રીં બીજમ્ । વીં શક્તિઃ । રં કીલકમ્ ॥

મમોપાત્ત સમસ્તદુરિતક્ષયાર્થં ચિન્તિતફલાવાપ્ત્યર્થં
ધર્માર્થકામમોક્ષ ચતુર્વિધફલપુરુષાર્થસિદ્ધ્યર્થં
શ્રીવીરભદ્રસહસ્રનામસ્તોત્રપાઠે વિનિયોગઃ ॥

અથ ધ્યાનમ્ ।
રૌદ્રં રુદ્રાવતારં હુતવહનયનં ચોર્ધ્વકેશં સુદંષ્ટ્રં
ભીમાઙ્ગં ભીમરૂપં કિણિકિણિરભસં જ્વાલમાલાઽઽવૃતાઙ્ગમ્ ।
ભૂતપ્રેતાદિનાથં કરકમલમહાખડ્ગપાત્રે વહન્તં
વન્દે લોકૈકવીરં ત્રિભુવનનમિતં શ્યામલં વીરભદ્રમ્ ॥

અથ સહસ્રનામસ્તોત્રમ્ ।
શમ્ભુઃ શિવો મહાદેવો શિતિકણ્ઠો વૃષધ્વજઃ ।
દક્ષાધ્વરકરો દક્ષઃ ક્રૂરદાનવભઞ્જનઃ ॥ ૧॥

કપર્દી કાલવિધ્વંસી કપાલી કરુણાર્ણવઃ ।
શરણાગતરક્ષૈકનિપુણો નીલલોહિતઃ ॥ ૨॥

નિરીશો નિર્ભયો નિત્યો નિત્યતૃપ્તો નિરામયઃ ।

ગમ્ભીરનિનદો ભીમો ભયઙ્કરસ્વરૂપધૃત્ ॥ ૩॥

પુરન્દરાદિ ગીર્વાણવન્દ્યમાનપદામ્બુજઃ ।
સંસારવૈદ્યઃ સર્વજ્ઞઃ સર્વભેષજભેષજઃ ॥ ૪॥

મૃત્યુઞ્જયઃ કૃત્તિવાસસ્ત્ર્યમ્બકસ્ત્રિપુરાન્તકઃ ।
વૃન્દારવૃન્દમન્દારો મન્દારાચલમણ્ડનઃ ॥ ૫॥

કુન્દેન્દુહારનીહારહારગૌરસમપ્રભઃ ।
રાજરાજસખઃ શ્રીમાન્ રાજીવાયતલોચનઃ ॥ ૬॥

મહાનટો મહાકાલો મહાસત્યો મહેશ્વરઃ ।
ઉત્પત્તિસ્થિતિસંહારકારણાનન્દકર્મકઃ ॥ ૭॥

સારઃ શૂરો મહાધીરો વારિજાસનપૂજિતઃ ।
વીરસિંહાસનારૂઢો વીરમૌલિશિખામણિઃ ॥ ૮॥

વીરપ્રિયો વીરરસો વીરભાષણતત્પરઃ ।
વીરસઙ્ગ્રામવિજયી વીરારાધનતોષિતઃ ॥ ૯॥

વીરવ્રતો વિરાડ્રૂપો વિશ્વચૈતન્યરક્ષકઃ ।
વીરખડ્ગો ભારશરો મેરુકોદણ્ડમણ્ડિતઃ ॥ ૧૦॥

વીરોત્તમાઙ્ગઃ શ‍ૃઙ્ગારફલકો વિવિધાયુધઃ ।
નાનાસનો નતારાતિમણ્ડલો નાગભૂષણઃ ॥ ૧૧॥

નારદસ્તુતિસન્તુષ્ટો નાગલોકપિતામહઃ ।
સુદર્શનઃ સુધાકાયો સુરારાતિવિમર્દનઃ ॥ ૧૨॥

અસહાયઃ પરઃ સર્વસહાયઃ સામ્પ્રદાયકઃ ।
કામદો વિષભુગ્યોગી ભોગીન્દ્રાઞ્ચિતકુણ્ડલઃ ॥ ૧૩॥

ઉપાધ્યાયો દક્ષરિપુઃ કૈવલ્યનિધિરચ્યુતઃ ।
સત્ત્વં રજસ્તમઃ સ્થૂલઃ સૂક્ષ્મોઽન્તર્બહિરવ્યયઃ ॥ ૧૪॥

ભૂરાપો જ્વલનો વાયુર્ગગનં ત્રિજગદ્ગુરુઃ ।
નિરાધારો નિરાલમ્બઃ સર્વાધારઃ સદાશિવઃ ॥ ૧૫॥

ભાસ્વરો ભગવાન્ ભાલનેત્રો ભાવજસંહરઃ ।
વ્યાલબદ્ધજટાજૂટો બાલચન્દ્રશિખામણિઃ ॥ ૧૬॥

અક્ષય્યૈકાક્ષરો દુષ્ટશિક્ષકઃ શિષ્ટરક્ષિતઃ ।
દક્ષપક્ષેષુબાહુલ્યવનલીલાગજો ઋજુઃ ॥ ૧૭॥

યજ્ઞાઙ્ગો યજ્ઞભુગ્યજ્ઞો યજ્ઞેશો યજનેશ્વરઃ ।
મહાયજ્ઞધરો દક્ષસમ્પૂર્ણાહૂતિકૌશલઃ ॥ ૧૮॥

માયામયો મહાકાયો માયાતીતો મનોહરઃ ।
મારદર્પહરો મઞ્જુર્મહીસુતદિનપ્રિયઃ ॥ ૧૯॥

સૌમ્યઃ સમોઽસમોઽનન્તઃ સમાનરહિતો હરઃ ।
સોમોઽનેકકલાધામા વ્યોમકેશો નિરઞ્જનઃ ॥ ૨૦॥

ગુરુઃ સુરગુરુર્ગૂઢો ગુહારાધનતોષિતઃ ।
ગુરુમન્ત્રાક્ષરગુરુઃ પરઃ પરમકારણમ્ ॥ ૨૧॥

કલિઃ કલાઢ્યો નીતિજ્ઞઃ કરાલાસુરસેવિતઃ ।
કમનીયરવિચ્છાયો નન્દનાનન્દવર્ધનઃ ॥ ૨૨॥

સ્વભક્તપક્ષઃ પ્રબલઃ સ્વભક્તબલવર્ધનઃ ।
સ્વભક્તપ્રતિવાદીન્દ્રમુખચન્દ્રવિતુન્તુદઃ ॥ ૨૩॥

શેષભૂષો વિશેષજ્ઞસ્તોષિતઃ સુમનાઃ સુધીઃ ।
દૂષકાભિજનોદ્ધૂતધૂમકેતુસ્સનાતનઃ ॥ ૨૪॥

દૂરીકૃતાઘપટલશ્ચોરીકૃતસુખપ્રજઃ ।
પૂરીકૃતેષુકોદણ્ડો નિર્વૈરીકૃતસઙ્ગરઃ ॥ ૨૫॥

બ્રહ્મવિદ્બ્રાહ્મણો બ્રહ્મ બ્રહ્મચારી જગત્પતિઃ ।
બ્રહ્મેશ્વરો બ્રહ્મમયઃ પરબ્રહ્માત્મકઃ પ્રભુઃ ॥ ૨૬॥

નાદપ્રિયો નાદમયો નાદબિન્દુર્નગેશ્વરઃ ।
આદિમધ્યાન્તરહિતો વાદો વાદવિદાં વરઃ ॥ ૨૭॥

ઇષ્ટો વિશિષ્ટસ્તુષ્ટઘ્નઃ પુષ્ટિદઃ પુષ્ટિવર્ધનઃ ।
કષ્ટદારિદ્ર્યનિર્નાશો દુષ્ટવ્યાધિહરો હરઃ ॥ ૨૮॥

પદ્માસનઃ પદ્મકરો નવપદ્માસનાર્ચિતઃ ।
નીલામ્બુજદલશ્યામો નિર્મલો ભક્તવત્સલઃ ॥ ૨૯॥

નીલજીમૂતસઙ્કાશઃ કાલકન્ધરબન્ધુરઃ ।
જપાકુસુમસન્તુષ્ટો જપહોમાર્ચ્યનપ્રિયઃ ॥ ૩૦॥

જગદાદિરનાદીશોઽજગવન્ધરકૌતુકઃ ।
પુરન્દરસ્તુતાનન્દઃ પુલિન્દઃ પુણ્યપઞ્જરઃ ॥ ૩૧॥

પૌલસ્ત્યચલિતોલ્લોલપર્વતઃ પ્રમદાકરઃ ।
કરણં કારણં કર્મ કરણીયાગ્રણીર્દૃઢઃ ॥ ૩૨॥

કરિદૈત્યેન્દ્રવસનઃ કરુણાપૂરવારિધિઃ ।
કોલાહલપ્રિયઃ પ્રીતઃ શૂલી વ્યાલકપાલભૃત્ ॥ ૩૩॥

કાલકૂટગલઃ ક્રીડાલીલાકૃતજગત્ત્રયઃ ।
દિગમ્બરો દિનેશેશો ધીમાન્ધીરો ધુરન્ધરઃ ॥ ૩૪॥

દિક્કાલાદ્યનવચ્છિન્નો ધૂર્જટિર્ધૂતદુર્ગતિઃ ।
કમનીયઃ કરાલાસ્યઃ કલિકલ્મષસૂદનઃ ॥ ૩૫॥

કરવીરોઽરુણામ્ભોજકલ્હારકુસુમાર્પિતઃ ।
ખરો મણ્ડિતદોર્દણ્ડઃ ખરૂપઃ કાલભઞ્જનઃ ॥ ૩૬॥

ખરાંશુમણ્ડલમુખઃ ખણ્ડિતારામતિણ્ડલઃ ।
ગણેશગણિતોઽગણ્યઃ પુણ્યરાશી સુખોદયઃ ॥ ૩૭॥

ગણાધિપકુમારાદિગણકૈરવબાન્ધવઃ ।
ઘનઘોષબૃહન્નાદઘનીકૃતસુનૂપુરઃ ॥ ૩૮॥

ઘનચર્ચિતસિન્દૂરો ઘણ્ટાભીષણભૈરવઃ ।
પરાપરો બલોઽનન્તશ્ચતુરશ્ચક્રબન્ધકઃ ॥ ૩૯॥

ચતુર્મુખમુખામ્ભોજચતુરસ્તુતિતોષણઃ ।
છલવાદી છલશ્શાન્તશ્છાન્દસશ્છાન્દસપ્રિયઃ ॥ ૪૦॥

છિન્નચ્છલાદિદુર્વાદચ્છિન્નષટ્તન્ત્રતાન્ત્રિકઃ ।
જડીકૃતમહાવજ્જજમ્ભારાતિર્નતોન્નતઃ ॥ ૪૧॥

જગદાધારભૂતેશો જગદન્તો નિરઞ્જનઃ ।
ઝર્ઝરધ્વનિસમ્યુક્તો ઝઙ્કારરવભૂષણઃ ॥ ૪૨॥

ઝટીવિપક્ષવૃક્ષૌઘઝઞ્ઝામારુતસન્નિભઃ ।
પ્રવર્ણાઞ્ચિતપત્રાઙ્કઃ પ્રવર્ણાદ્યક્ષરવ્રજઃ ॥ ૪૩॥

ટ વર્ણબિન્દુસમ્યુક્તષ્ટઙ્કારહૃતદિગ્ગજઃ ।

ઠ વર્ણપૂરદ્વિદળષ્ટવર્ણાગ્રદળાક્ષરઃ ॥ ૪૪॥

ઠ વર્ણયુતસદ્યન્ત્રશ્ચ જ ચાક્ષરપૂરકઃ ।
ડમરુધ્વનિસમ્પ્રક્તો ડમ્બરાનન્દતાણ્ડવઃ ॥ ૪૫॥

ડણ્ડણ્ઢઘોષપ્રમદાડડમ્બરો ગણતાણ્ડવઃ ।
ઢક્કાપટહસુપ્રીતો ઢક્કારવવશાનુગઃ ॥ ૪૬॥

ઢક્કાદિતાળસન્તુષ્ટો ટોડિબદ્ધસ્તુતિપ્રિયઃ ।
તપસ્વિરૂપસ્તપનસ્તપ્તકાઞ્ચનસન્નિભઃ ॥ ૪૭॥

તપસ્વિવદનામ્ભોજકારુણ્યસ્તરણિદ્યુતિઃ ।
ઢગાદિવાદસૌહાર્દસ્થિતઃ સમ્યમિનાં વરઃ ॥ ૪૮॥

સ્થાણુસ્તણ્ડુનુતિપ્રીતઃ સ્થિતિસ્થાવરજઙ્ગમઃ ।
દરહાસાનનામ્ભોજદન્તહીરાવળિદ્યુતિઃ ॥ ૪૯॥

દર્વીકરાઙ્ગતભુજો દુર્વારો દુઃખદુર્ગહા ।
ધનાધિપસખો ધીરો ધર્માધર્મપરાયણઃ ॥ ૫૦॥

ધર્મધ્વજો દાનશૌણ્ડો ધર્મકર્મફલપ્રદઃ ।
પશુપાશહારઃ શર્વઃ પરમાત્મા સદાશિવઃ ॥ ૫૧॥

પરાપરઃ પરશુધૃત્ પવિત્રઃ સર્વપાવનઃ ।
ફલ્ગુનસ્તુતિસન્તુષ્ટઃ ફલ્ગુનાગ્રજવત્સલઃ ॥ ૫૨॥

ફલ્ગુનાર્જિતસઙ્ગ્રામફલપાશુપતપ્રદઃ ।
બલો બહુવિલાસાઙ્ગો બહુલીલાધરો બહુઃ ॥ ૫૩॥

બર્હિર્મુખો સુરારાધ્યો બલિબન્ધનબાન્ધવઃ ।
ભયઙ્કરો ભવહરો ભર્ગો ભયહરો ભવઃ ॥ ૫૪॥

ભાલાનલો બહુભુજો ભાસ્વાન્ સદ્ભક્તવત્સલઃ ।
મન્ત્રો મન્ત્રગણો મન્ત્રી મન્ત્રારાધનતોષિતઃ ॥ ૫૫॥

મન્ત્રયજ્ઞો મન્ત્રવાદી મન્ત્રબીજો મહાન્મહઃ ।
યન્ત્રો યન્ત્રમયો યન્ત્રી યન્ત્રજ્ઞો યન્ત્રવત્સલઃ ॥ ૫૬॥

યન્ત્રપાલો યન્ત્રહરસ્ત્રિજગદ્યન્ત્રવાહકઃ ।
રજતાદ્રિસદાવાસો રવીન્દુશિખિલોચનઃ ॥ ૫૭॥

રતિશ્રાન્તો જિતશ્રાન્તો રજનીકરશેખરઃ ।
લલિતો લાસ્યસન્તુષ્ટો લબ્ધોગ્રો લઘુસાહસઃ ॥ ૫૮॥

લક્ષ્મીનિજકરો લક્ષ્યલક્ષણજ્ઞો લસન્મતિઃ ।
વરિષ્ઠો વરદો વન્દ્યો વરદાનપરો વશી ॥ ૫૯॥

વૈશ્વાનરાઞ્ચિતભુજો વરેણ્યો વિશ્વતોમુખઃ ।
શરણાર્તિહરઃ શાન્તઃ શઙ્કરઃ શશિશેખરઃ ॥ ૬૦॥

શરભઃ શમ્બરારાતિર્ભસ્મોદ્ધૂળિતવિગ્રહઃ ।
ષટ્ત્રિંશત્તત્ત્વવિદ્રૂપઃ ષણ્મુખસ્તુતિતોષણઃ ॥ ૬૧॥

ષડક્ષરઃ શક્તિયુતઃ ષટ્પદાદ્યર્થકોવિદઃ ।
સર્વજ્ઞઃ સર્વસર્વેશઃ સર્વદાઽઽનન્દકારકઃ ॥ ૬૨॥

સર્વવિત્સર્વકૃત્સર્વઃ સર્વદઃ સર્વતોમુખઃ ।
હરઃ પરમકલ્યાણો હરિચર્મધરઃ પરઃ ॥ ૬૩॥

હરિણાર્ધકરો હંસો હરિકોટિસમપ્રભઃ ।
દેવદેવો જગન્નાથો દેવેશો દેવવલ્લભઃ ॥ ૬૪॥

દેવમૌલિશિખારત્નં દેવાસુરસુતોષિતઃ ।
સુરૂપઃ સુવ્રતઃ શુદ્ધસ્સુકર્મા સુસ્થિરઃ સુધીઃ ॥ ૬૫॥

સુરોત્તમઃ સુફલદઃ સુરચિન્તામણિઃ શુભઃ ।
કુશલી વિક્રમસ્તર્કઃ કુણ્ડલીકૃતકુણ્ડલી ॥ ૬૬॥

ખણ્ડેન્દુકારકજટાજૂટઃ કાલાનલદ્યુતિઃ ।
વ્યાઘ્રચર્મામ્બરધરો વ્યાઘ્રોગ્રબહુસાહસઃ ॥ ૬૭॥

વ્યાળોપવીતી વિલસચ્છોણતામરસામ્બકઃ ।
દ્યુમણિસ્તરણિર્વાયુઃ સલિલં વ્યોમ પાવકઃ ॥ ૬૮॥

સુધાકરો યજ્ઞપતિરષ્ટમૂર્તિઃ કૃપાનિધિઃ ।
ચિદ્રૂપશ્ચિદ્ઘનાનન્દકન્દશ્ચિન્મયનિષ્કલઃ ॥ ૬૯॥

નિર્દ્વન્દ્વો નિષ્પ્રભો નિત્યો નિર્ગુણો નિર્ગતામયઃ ।
વ્યોમકેશો વિરૂપાક્ષો વામદેવો નિરઞ્જનઃ ॥ ૭૦॥

નામરૂપઃ શમધુરઃ કામચારી કલાધરઃ ।
જામ્બૂનદપ્રભો જાગ્રજ્જન્માદિરહિતોજ્જ્વલઃ ॥ ૭૧॥

જનકઃ સર્વજન્તૂનાં જન્મદુઃખાપનોદનઃ ।
પિનાકપાણિરક્રોધઃ પિઙ્ગલાયતલોચનઃ ॥ ૭૨॥

પરમાત્મા પશૂપતિઃ પાવનઃ પ્રમથાધિપઃ ।
પ્રણવઃ કામદઃ કાન્તઃ શ્રીપ્રદો દિવ્યલોચનઃ ॥ ૭૩॥

પ્રણતાર્તિહરઃ પ્રાણઃ પરઞ્જ્યોતિઃ પરાત્પરઃ ।
તુષ્ટસ્તુહિનશૈલાધિવાસઃ સ્તોતૃવરપ્રદઃ ॥ ૭૪॥

ઇષ્ટકામ્યાર્થફલદઃ સૃષ્ટિકર્તા મરુત્પતિઃ ।
ભૃગ્વત્રિકણ્વજાબાલિ હૃત્પદ્માહિમદીધિતિઃ ॥ ૭૫॥

ક્રતુધ્વંસી ક્રતુમુખઃ ક્રતુકોટિફલપ્રદઃ ।
ક્રતુઃ ક્રતુમયઃ ક્રૂરદર્પઘ્નો વિક્રમો વિભુઃ ॥ ૭૬॥

દધીચિહૃદયાનન્દો દધીચ્યાદિસુપાલકઃ ।
દધીચિવાઞ્છિતસખો દધીચિવરદોઽનઘઃ ॥ ૭૭॥

સત્પથક્રમવિન્યાસો જટામણ્ડલમણ્ડિતઃ ।
સાક્ષિત્રયીમયશ્ચારુકલાધરકપર્દભૃત્ ॥ ૭૮॥

માર્કણ્ડેયમુનિપ્રીતો મૃડો જિતપરેતરાટ્ ।
મહીરથો વેદહયઃ કમલાસનસારથિઃ ॥ ૭૯॥

કૌણ્ડિન્યવત્સવાત્સલ્યઃ કાશ્યપોદયદર્પણઃ ।
કણ્વકૌશિકદુર્વાસાહૃદ્ગુહાન્તર્નિધિર્નિજઃ ॥ ૮૦॥

કપિલારાધનપ્રીતઃ કર્પૂરધવલદ્યુતિઃ ।
કરુણાવરુણઃ કાળીનયનોત્સવસઙ્ગરઃ ॥ ૮૧॥

ઘૃણૈકનિલયો ગૂઢતનુર્મુરહરપ્રિયઃ ।
ગણાધિપો ગુણનિધિર્ગમ્ભીરાઞ્ચિત વાક્પતિઃ ॥ ૮૨॥

વિઘ્નનાશો વિશાલાક્ષો વિઘ્નરાજો વિશેષવિત્ ।
સપ્તયજ્ઞયજઃ સપ્તજિહ્વા જિહ્વાતિસંવરઃ ॥ ૮૩॥

અસ્થિમાલાઽઽવિલશિરો વિસ્તારિતજગદ્ભુજઃ ।
ન્યસ્તાખિલસ્રજસ્તોકવિભવઃ પ્રભુરીશ્વરઃ ॥ ૮૪॥

ભૂતેશો ભુવનાધારો ભૂતિદો ભૂતિભૂષણઃ ।

ભૂતાત્મકાત્મકો ભૂર્ભુવાદિ ક્ષેમકરઃ શિવઃ ॥ ૮૫॥

અણોરણીયાન્મહતો મહીયાન્ વાગગોચરઃ ।
અનેકવેદવેદાન્તતત્ત્વબીજસ્તપોનિધિઃ ॥ ૮૬॥

મહાવનવિલાસોઽતિપુણ્યનામા સદાશુચિઃ ।
મહિષાસુરમર્દિન્યા નયનોત્સવસઙ્ગરઃ ॥ ૮૭॥

શિતિકણ્ઠઃ શિલાદાદિ મહર્ષિનતિભાજનઃ ।
ગિરિશો ગીષ્પતિર્ગીતવાદ્યનૃત્યસ્તુતિપ્રિયઃ ॥ ૮૮॥

અઙ્ગીકૃતઃ સુકૃતિભિઃ શ૰ૃઙ્ગારરસજન્મભૂઃ ।
ભૃઙ્ગીતાણ્ડવસન્તુષ્ટો મઙ્ગલો મઙ્ગલપ્રદઃ ॥ ૮૯॥

મુક્તેન્દ્રનીલતાટઙ્કો મુક્તાહારવિભૂષિતઃ ।
સક્તસજ્જનસદ્ભાવો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૯૦॥

સુરૂપઃ સુન્દરઃ શુક્લધર્મઃ સુકૃતવિગ્રહઃ ।
જિતામરદ્રુમઃ સર્વદેવરાડસમેક્ષણઃ ॥ ૯૧॥

દિવસ્પતિસહસ્રાક્ષવીક્ષણાવળિતોષકઃ ।
દિવ્યનામામૃતરસો દિવાકરપતિઃ પ્રભુઃ ॥ ૯૨॥

પાવકપ્રાણસન્મિત્રં પ્રખ્યાતોર્ધ્વજ્વલન્મહઃ ।
પ્રકૃષ્ટભાનુઃ પુરુષઃ પુરોડાશભુગીશ્વરઃ ॥ ૯૩॥

સમવર્તી પિતૃપતિર્ધર્મરાટ્શમનો યમી ।
પિતૃકાનનસન્તુષ્ટો ભૂતનાયકનાયકઃ ॥ ૯૪॥

નયાન્વિતઃ સુરપતિર્નાનાપુણ્યજનાશ્રયઃ ।
નૈરૃત્યાદિ મહારાક્ષસેન્દ્રસ્તુતયશોઽમ્બુધિઃ ॥ ૯૫॥

પ્રચેતાજીવનપતિર્ધૃતપાશો દિગીશ્વરઃ ।
ધીરોદારગુણામ્ભોધિકૌસ્તુભો ભુવનેશ્વરઃ ॥ ૯૬॥

સદાનુભોગસમ્પૂર્ણસૌહાર્દઃ સુમનોજ્જ્વલઃ ।
સદાગતિઃ સારરસઃ સજગત્પ્રાણજીવનઃ ॥ ૯૭॥

રાજરાજઃ કિન્નરેશઃ કૈલાસસ્થો ધનપ્રદઃ ।
યક્ષેશ્વરસખઃ કુક્ષિનિક્ષિપ્તાનેકવિસ્મયઃ ॥ ૯૮॥

ઈશાનઃ સર્વવિદ્યાનામીશ્વરો વૃષલાઞ્છનઃ ।
ઇન્દ્રાદિદેવવિલસન્મૌલિરમ્યપદામ્બુજઃ ॥ ૯૯॥

વિશ્વકર્માઽઽશ્રયો વિશ્વતોબાહુર્વિશ્વતોમુખઃ ।
વિશ્વતઃ પ્રમદો વિશ્વનેત્રો વિશ્વેશ્વરો વિભુઃ ॥ ૧૦૦॥

સિદ્ધાન્તઃ સિદ્ધસઙ્કલ્પઃ સિદ્ધગન્ધર્વસેવિતઃ ।
સિદ્ધિતઃ શુદ્ધહૃદયઃ સદ્યોજાતાનનશ્શિવઃ ॥ ૧૦૧॥

શ્રીમયઃ શ્રીકટાક્ષાઙ્ગઃ શ્રીનામા શ્રીગણેશ્વરઃ ।
શ્રીદઃ શ્રીવામદેવાસ્યઃ શ્રીકણ્ઠઃ શ્રીપ્રિયઙ્કરઃ ॥ ૧૦૨॥

ઘોરાઘધ્વાન્તમાર્તાણ્ડો ઘોરેતરફલપ્રદઃ ।
ઘોરઘોરમહાયન્ત્રરાજો ઘોરમુખામ્બુજઃ ॥ ૧૦૩॥

તતઃ સુષિર સુપ્રીત તત્ત્વાદ્યાગમજન્મભૂઃ ।
તત્ત્વમસ્યાદિ વાક્યાર્થસ્તત્પૂર્વમુખમણ્ડિતઃ ॥ ૧૦૪॥

આશાપાશવિનિર્મુક્તઃ શેષભૂષણભૂષિતઃ ।
દોષાકરલસન્મૌલિરીશાનમુખનિર્મલઃ ॥ ૧૦૫॥

પઞ્ચવક્ત્રો દશભુજઃ પઞ્ચાશદ્વર્ણનાયકઃ ।
પઞ્ચાક્ષરયુતઃ પઞ્ચઃ પઞ્ચ પઞ્ચ સુલોચનઃ ॥ ૧૦૬॥

વર્ણાશ્રમગુરુઃ સર્વવર્ણાધારઃ પ્રિયઙ્કરઃ ।
કર્ણિકારાર્ક દુત્તૂર પૂર્ણપૂજાફલપ્રદઃ ॥ ૧૦૭॥

યોગીન્દ્રહૃદયાનન્દો યોગી યોગવિદાં વરઃ ।
યોગધ્યાનાદિસન્તુષ્ટો રાગાદિરહિતો રમઃ ॥ ૧૦૮॥

ભવામ્ભોધિપ્લવો બન્ધમોચકો ભદ્રદાયકઃ ।
ભક્તાનુરક્તો ભવ્યઃ સદ્ભક્તિદો ભક્તિભાવનઃ ॥ ૧૦૯॥

અનાદિનિધનોઽભીષ્ટો ભીમકાન્તોઽર્જુનો બલઃ ।
અનિરુદ્ધઃ સત્યવાદી સદાનન્દાશ્રયોઽનઘઃ ॥ ૧૧૦॥

આલયઃ સર્વવિદ્યાનામાધારઃ સર્વકર્મણામ્ ।
આલોકઃ સર્વલોકાનામાવિર્ભાવો મહાત્મનામ્ ॥ ૧૧૧॥

ઇજ્યાપૂર્તેષ્ટફલદઃ ઇચ્છાશક્ત્યાદિ સંશ્રયઃ ।
ઇનઃ સર્વામરારાધ્ય ઈશ્વરો જગદીશ્વરઃ ॥ ૧૧૨॥

રુણ્ડપિઙ્ગલમધ્યસ્થો રુદ્રાક્ષાઞ્ચિતકન્ધરઃ ।
રુણ્ડિતાધારભક્ત્યાદિરીડિતઃ સવનાશનઃ ॥ ૧૧૩॥

ઉરુવિક્રમબાહુલ્ય ઉર્વ્યાધારો ધુરન્ધરઃ ।
ઉત્તરોત્તરકલ્યાણ ઉત્તમોત્તમનાયકઃ ॥ ૧૧૪॥

ઊરુજાનુતડિદ્વૃન્દ ઊર્ધ્વરેતા મનોહરઃ ।
ઊહિતાનેકવિભવ ઊહિતામ્નાયમણ્ડલઃ ॥ ૧૧૫॥

ઋષીશ્વરસ્તુતિપ્રીતો ઋષિવાક્યપ્રતિષ્ઠિતઃ ।
ઋગાદિ નિગમાધારો ઋજુકર્મા મનોજવઃ ॥ ૧૧૬॥

રૂપાદિ વિષયાધારો રૂપાતીતો ઋષીશ્વરઃ ।
રૂપલાવણ્યસમ્યુક્તો રૂપાનન્દસ્વરૂપધૃત્ ॥ ૧૧૭॥

લુલિતાનેકસઙ્ગ્રામો લુપ્યમાનરિપુવ્રજઃ ।
લુમ્રક્રૂરાન્ધકો વારો લૂકારાઞ્ચિતયન્ત્રધૃત્ ॥ ૧૧૮॥

લૂકારાદિ વ્યાધિહરો લૂસ્વરાઞ્ચિતયન્ત્રયુક્ ।
લૂશાદિ ગિરિશઃ પક્ષઃ ખલવાચામગોચરઃ ॥ ૧૧૯॥

એષ્યમાણો નતજન એકચ્ચિતો દૃઢવ્રતઃ ।
એકાક્ષરમહાબીજ એકરુદ્રોઽદ્વિતીયકઃ ॥ ૧૨૦॥

ઐશ્વર્યવર્ણનામાઙ્ગ ઐશ્વર્યપ્રકરોજ્જ્વલઃ ।
ઐરાવણાદિ લક્ષ્મીશ ઐહિકામુષ્મિકપ્રદઃ ॥ ૧૨૧॥

ઓષધીશશિખારત્ન ઓઙ્કારાક્ષરસમ્યુતઃ ।
ઓકઃ સકલદેવાનામોજોરાશિરજાદ્યજઃ ॥ ૧૨૨॥

ઔદાર્યજીવનપર ઔચિત્યમણિજન્મભૂઃ ।
ઉદાસીનૈકગિરિશ ઉત્સવોત્સવકારણૌ ॥ ૧૨૩॥

અઙ્ગીકૃતષડઙ્ગાઙ્ગ અઙ્ગહારમહાનટઃ ।
અઙ્ગજાઙ્ગજભસ્માઙ્ગો મઙ્ગલાયતવિગ્રહઃ ॥ ૧૨૪॥

કઃ કિં ત્વદનુ દેવેશઃ કઃ કિન્નુ વરદપ્રદઃ ।
કઃ કિન્નુ ભક્તસન્તાપહરઃ કારુણ્યસાગરઃ ॥ ૧૨૫॥

સ્તોતવ્યઃ સ્તોતુમિચ્છૂનાં મન્તવ્યઃ શરણાર્થિનામ્ ।

ધ્યેયો ધ્યાનૈકનિષ્ઠાનાં ધામ્નઃ પરમપૂરકઃ ॥ ૧૨૬॥

ભગનેત્રહરઃ પૂતઃ સાધુદૂષકભૂષણઃ ।
ભદ્રકાળિમનોરાજો હંસઃ સત્કર્મસારથિઃ ॥ ૧૨૭॥

સભ્યઃ સાધુઃ સભારત્નં સૌન્દર્યગિરિશેખરઃ ।
સુકુમારઃ સૌખ્યકરઃ સહિષ્ણુઃ સાધ્યસાધનમ્ ॥ ૧૨૮॥

નિર્મત્સરો નિષ્પ્રપઞ્ચો નિર્લોભો નિર્ગુણો નયઃ ।
વીતાભિમાનો નિર્જાતો નિરાતઙ્કો નિરઞ્જનઃ ॥ ૧૨૯॥

કાલત્રયઃ કલિહરો નેત્રત્રયવિરાજિતઃ ।
અગ્નિત્રયનિભાઙ્ગશ્ચ ભસ્મીકૃતપુરત્રયઃ ॥ ૧૩૦॥

કૃતકાર્યો વ્રતધરો વ્રતનાશઃ પ્રતાપવાન્ ।
નિરસ્તદુર્વિધિર્નિર્ગતાશો નિર્વાણનીરધિઃ ॥ ૧૩૧॥

નિધાનં સર્વહેતૂનાં નિશ્ચિતાર્થેશ્વરેશ્વરઃ ।
અદ્વૈતશામ્ભવમહો સનિર્વ્યાજોર્ધ્વલોચનઃ ॥ ૧૩૨॥

અપૂર્વપૂર્વઃ પરમઃ સપૂર્વઃ પૂર્વપૂર્વદિક્ ।
અતીન્દ્રિયઃ સત્યનિધિરખણ્ડાનન્દવિગ્રહઃ ॥ ૧૩૩॥

આદિદેવઃ પ્રસન્નાત્મા આરાધકજનેષ્ટદઃ ।
સર્વદેવમયઃ સર્વઃ જગદ્વ્યાસઃ સુલક્ષણઃ ॥ ૧૩૪॥

સર્વાન્તરાત્મા સદૃશઃ સર્વલોકૈકપૂજિતઃ ।
પુરાણપુરુષઃ પુણ્યઃ પુણ્યશ્લોકઃ સુધામયઃ ॥ ૧૩૫॥

પૂર્વાપરજ્ઞઃ પુરજિત્ પૂર્વદેવામરાર્ચિતઃ ।
પ્રસન્નદર્શિતમુખઃ પન્નગાવળિભૂષણઃ ॥ ૧૩૬॥

પ્રસિદ્ધઃ પ્રણતાધારઃ પ્રલયોદ્ભૂતકારણમ્ ।
જ્યોતિર્મયો જ્વલદ્દંષ્ટ્રો જ્યોતિર્માલાવળીવૃતઃ ॥ ૧૩૭॥

જાજ્જ્વલ્યમાનો જ્વલનનેત્રો જલધરદ્યુતિઃ ।
કૃપામ્ભોરાશીરમ્લાનો વાક્યપુષ્ટોઽપરાજિતઃ ॥ ૧૩૮॥

ક્ષપાકરાર્કકોટિપ્રભાકરઃ કરુણાકરઃ ।
એકમૂર્તિસ્ત્રિધામૂર્તિર્દિવ્યમૂર્તિરનાકુલઃ ॥ ૧૩૯॥

અનન્તમૂર્તિરક્ષોભ્યઃ કૃપામૂર્તિઃ સુકીર્તિધૃત્ ।
અકલ્પિતામરતરુરકામિતસુકામધુક્ ॥ ૧૪૦॥

અચિન્તિતમહાચિન્તામણિર્દેવશિખામણિઃ ।
અતીન્દ્રિયોઽજિતઃ પ્રાંશુર્બ્રહ્મવિષ્ણ્વાદિવન્દિતઃ ॥ ૧૪૧॥

હંસો મરીચિર્ભીમશ્ચ રત્નસાનુશરાસનઃ ।
સમ્ભવોઽતીન્દ્રિયો વૈદ્યો વિશ્વરૂપી નિરઞ્જનઃ ॥ ૧૪૨॥

વસુદઃ સુભુજો નૈકમાયોઽવ્યયઃ પ્રમાદનઃ ।
અગદો રોગહર્તા ચ શરાસનવિશારદઃ ॥ ૧૪૩॥

માયાવિશ્વાદનો વ્યાપી પિનાકકરસમ્ભવઃ ।
મનોવેગો મનોરુપી પૂર્ણઃ પુરુષપુઙ્ગવઃ ॥ ૧૪૪॥

શબ્દાદિગો ગભીરાત્મા કોમલાઙ્ગઃ પ્રજાગરઃ ।
ત્રિકાલજ્ઞો મુનિઃ સાક્ષી પાપારિઃ સેવકપ્રિયઃ ॥ ૧૪૫॥

ઉત્તમઃ સાત્ત્વિકઃ સત્યઃ સત્યસન્ધો નિરાકુલઃ ।
રસો રસજ્ઞો સારજ્ઞો લોકસારો રસાત્મકઃ ॥ ૧૪૬॥

પૂષાદન્તભિદવ્યગ્રો દક્ષયજ્ઞનિષૂદનઃ ।
દેવાગ્રણીઃ શિવધ્યાનતત્પરઃ પરમઃ શુભઃ ॥ ૧૪૭॥

જયો જયાદિઃ સર્વાઘશમનો ભવભઞ્જનઃ ।
અલઙ્કરિષ્ણુરચલો રોચિષ્ણુર્વિક્રમોત્તમઃ ॥ ૧૪૮॥

શબ્દગઃ પ્રણવો વાયુરંશુમાનનિલતાપહૃત્ । વાયુરંશુમાનનલ
નિરીશો નિર્વિકલ્પશ્ચ ચિદ્રૂપો જિતસાધ્વસઃ ॥ ૧૪૯॥

ઉત્તારણો દુષ્કૃતિહા દુર્ધર્ષો દુસ્સહોઽભયઃ ।
નક્ષત્રમાલી નાકેશઃ સ્વાધિષ્ઠાનષડાશ્રયઃ ॥ ૧૫૦॥

અકાયો ભક્તકાયસ્થઃ કાલજ્ઞાની મહાનટઃ ।
અંશુઃ શબ્દપતિર્યોગી પવનઃ શિખિસારથિઃ ॥ ૧૫૧॥

વસન્તો માધવો ગ્રીષ્મઃ પવનઃ પાવનોઽમલઃ ।
વારુર્વિશલ્યચતુરઃ શિવચત્વરસંસ્થિતઃ ॥ ૧૫૨॥

આત્મયોગઃ સમામ્નાયતીર્થદેહઃ શિવાલયઃ ।
મુણ્ડો વિરૂપો વિકૃતિર્દણ્ડો દાન્તો ગુણોત્તમઃ ॥ ૧૫૩॥

દેવાસુરગુરુર્દેવો દેવાસુરનમસ્કૃતઃ ।
દેવાસુરમહામન્ત્રો દેવાસુરમહાશ્રયઃ ॥ ૧૫૪॥

દિવોઽચિન્ત્યો દેવતાઽઽત્મા ઈશોઽનીશો નગાગ્રગઃ ।
નન્દીશ્વરો નન્દિસખો નન્દિસ્તુતપરાક્રમઃ ॥ ૧૫૫॥

નગ્નો નગ્નવ્રતધરઃ પ્રલયાકારરૂપધૃત્ ।
સેશ્વરઃ સ્વર્ગદઃ સ્વર્ગઃ સ્વરઃ સર્વમયઃ સ્વનઃ ॥ ૧૫૬॥

બીજાધ્યક્ષો બીજકર્તા ધર્મકૃદ્ધર્મવર્ધનઃ ।
દક્ષયજ્ઞમહાદ્વેષી વિષ્ણુકન્ધરપાતનઃ ॥ ૧૫૭॥

ધૂર્જટિઃ ખણ્ડપરશુઃ સકલો નિષ્કલોઽસમઃ ।
મૃડો નટઃ પૂરયિતા પુણ્યક્રૂરો મનોજવઃ ॥ ૧૫૮॥

સદ્ભૂતઃ સત્કૃતઃ શાન્તઃ કાલકૂટો મહાનઘઃ ।
અર્થાનર્થો મહાકાયો નૈકકર્મસમઞ્જસઃ ॥ ૧૫૯॥

ભૂશયો ભૂષણો ભૂતિર્ભૂષણો ભૂતવાહનઃ ।
શિખણ્ડી કવચી શૂલી જટી મુણ્ડી ચ કુણ્ડલી ॥ ૧૬૦॥

મેખલી મુસલી ખડ્ગી કઙ્કણીકૃતવાસુકિઃ ॥ ૧૬૧॥

ઉત્તરભાગમ્ ।

એતત્સહસ્રનામાઙ્કું વીરભદ્રસ્ય કીર્તનમ્ ।
એકૈકાક્ષરમાહાત્મ્યં મહાપાતકનાશનમ્ ॥ ૧૬૨॥

મહાવ્યાધિહરં મૃત્યુદારિદ્ર્યતિમિરાઞ્જનમ્ ।
મહાસંસારજલધિમગ્નોત્તારણનાવિકઃ ॥ ૧૬૩
ધર્માર્થકામમોક્ષાણાં નિજગેહં નિરર્ગલમ્ ।
કર્મભક્તિચિદાનન્દં કન્દકારણકન્દકમ્ ॥ ૧૬૪॥

રસં રસાયનં દિવ્યં નામામૃતરસં નરઃ ।
શ‍ૃણુયાદ્યઃ સ્મરન્યોઽપિ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૬૫॥

અગ્નિષ્ટોમસ્ય યજ્ઞસ્ય વાજપેયશતસ્ય ચ ।
કન્યાદાનસહસ્રસ્ય યત્ફલં લભતે નરઃ ॥ ૧૬૬॥

તત્ફલઙ્કોટિગુણિતં નામૈકસ્ય સકૃજ્જપાત્ ।

આયુરારોગ્યસૌભાગ્યં પુત્રપૌત્રપ્રવર્ધનમ્ ॥ ૧૬૭॥

ઐહિકામુષ્મિકભયચ્છેદનં સુખસાધનમ્ ।
કુષ્ઠાપસ્મારપૈશાચચેષ્ટાદિરુજનાશકમ્ ॥ ૧૬૮॥

અશ્મરીં વાતશીતોષ્ણં જ્વરં માહેશ્વરીજ્વરમ્ ।
ત્રિદોષજં સન્નિપાતં કુક્ષિનેત્રશિરોવ્યથામ્ ॥ ૧૬૯॥

મૃત્યુદારિદ્ર્યજન્માદિ તીવ્રદુઃખનિવારણમ્ ।
મારણં મોહનં ચૈવ સ્તમ્ભનોચ્ચાટનં તથા ॥ ૧૭૦॥

વિદ્વેષણં કર્ષણં ચ કુટિલં વૈરિચેષ્ટિતમ્ ।
વિષશસ્ત્રોરગવ્યાઘ્રભયં ચોરાગ્નિશત્રુજમ્ ॥ ૧૭૧॥

ભૂતવેતાલયક્ષાદિ બ્રહ્મરાક્ષસજં ભયમ્ ।
શાકિન્યાદિ ભયં ભૈરવોદ્ભવં બહુદ્વિટ્ભયમ્ ॥ ૧૭૨॥

ત્યજન્ત્યેવ સકૃત્ સ્તોત્રં યઃ સ્મરેદ્ભીતમાનસઃ ।
યઃ સ્મરેત્ વીરભદ્રેતિ લભેત્ સત્યં શ્રિયં જયમ્ ॥ ૧૭૩॥

વીરભદ્રસ્ય નામ્નાં યત્ સહસ્રં સર્વસિદ્ધિદમ્ ।
વજ્રપઞ્જરમિત્યુક્તં વિષ્ણુના પ્રભવિષ્ણુના ॥ ૧૭૪॥

કરચિન્તામણિનિભં સ્વૈરકામદગોસમમ્ ।
સ્વાઙ્ગણસ્થામરતરુસમાનમસમોપમમ્ ॥ ૧૭૫॥

એકકાલં દ્વિકાલં વા ત્રિકાલં નિત્યમેવ વા ।
યઃ પઠેદ્વીરભદ્રસ્ય સ્તોત્રં મન્ત્રમિદં નરઃ ॥ ૧૭૬॥

ઇહ ભુક્ત્વાખિલાન્ભોગાનન્તે શિવપદં વ્રજેત્ ॥ ૧૭૭॥

ઇતિ શ્રીમત્પદ્મપુરાણે ઉપરિભાગે દક્ષાધ્વરે શ્રીમહાશરભ-
નૃસિંહયુદ્ધે નરહરિરૂપનારાયણપ્રોક્તં શ્રીવીરભદ્ર-
સહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*shrIvIrabhadrasahasranAmastotram*

pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*